श्रीमात्रे नमः

श्रीप्रासादपरमेश्वराय नमः

श्रीविद्यानृसिंहाय नमः

Mudras form an important part of Upasana and incorrect usage of Mudras angers the Yoginis. Mudras should never be displayed except in the presence of Srichakra and Sri Guru. Also, Mudras should never be displayed in front of a non-initiate. These days, gullible aspirants are taught mere finger-twisting in the name of the Mudras which does not confirm with the scriptures. The answer for any enquiry regarding the shAstra pramANa is – 'this is what is followed in our sampradAya'. Every sat-sampradAya derives its practices from valid shAstras held as pramANa by the Acharyas of that particular lineage. The interpretation of the accepted pramANa is where one needs to consult teachings particular to one's sampradAya. Teachings which do not have shAstra praNAma cannot be characterized as sAmpradAyika and those following such pseudo-practices can only be referred to as belonging to an apa-sampradAya. For those who do not belong to these pseudo neo apa-sampradaya-s, here is a collection of Mudras from various scriptures and also the correct interpretation of these Mudras as detailed by great scholars like Sri Bhaskararaya, Sri Maheshwaranadanatha, Sri Purnanandanatha etc. A general guideline while examining those Mudras which are described differently in different Tantras would be to give priority to that pramANa which is more acceptable to one's Guru sampradAya. Also, aspects such as whether the tantra belongs to shrIkula or kAlIkula, if the pramANa is peculiar to shaiva, shAkta, vaiShNava krama-s etc. need to be considered.

# श्रीविद्या मुद्राः

ललितातन्त्रे -

संक्षोभद्रावणाकर्षवश्योन्मादमहाङ्कुशाः ।

खेचरीबीजयोन्याख्या नवमुद्राः प्रकीर्तिताः ॥

## त्रिखण्डा मुद्रा

त्रीन् - जन्ममृत्युजरा - यद्वा सत्वरजस्तमो गुणान् - खण्डयतीति त्रिखण्डा केवलमोक्षप्रदेत्यर्थः। यद्वा त्रीणि खण्डानि कलाः इच्छाज्ञानक्रियाऽऽत्मिकाः तत्स्वरूपा त्रिखण्डा।

योगिनीतन्त्रे -

मुद्राख्या सा यदा संविदम्बिका त्रिकलामयी।
त्रिखण्डारूपमापन्ना सदा सन्निधिकारिणी।
सर्वस्य चक्रराजस्य व्यापिका परिकीर्तिता॥

वामकेश्वरतन्त्रे -

परिवर्त्य करौ स्पष्टावङ्गुष्ठौ कारयेत्समौ।
अनामान्तर्गते कृत्वा तर्जन्यौ कुटिलाकृती॥
कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि।
त्रिखण्डेयं महामुद्रा त्रिपुराह्वानकर्मणि॥

परस्परान्तः प्रवेशिताङ्गुलिकौ हस्तौ सम्मुखौ कृत्वा दक्षतर्जन्या वामानामिकाग्रं वामतर्जन्या दक्षानामिकाग्रं च गृह्णीयात्। ततः कनिष्ठिकायुगलं मध्यमायुगलं अङ्गुष्ठयुगलं च परस्पराभिमुख्येन सरलं कुर्यात्। सेयं युगलात्मक खण्डत्रयेण युक्ता त्रिखण्डा त्रिपुराया

आह्वाने विनियुक्ता। अत्र परस्परान्तरङ्गुलीनां प्रवेश एव परिवर्तनपदेनोक्तः। स्पृष्टौ संयुक्तावङ्गुष्ठौ समौ सरलप्रसरौ। अनामे अन्तर्गत ययोस्ते तर्जन्यौ कुटिलाकृती आकुञ्चिताग्रे कृत्वा कनिष्ठिके द्वे नियुञ्जीत परस्परं योजयेत्। अत्र निजस्थानपदं लक्षणया मध्यस्थानस्थितमध्यमाङ्गुलिपरम्। मध्यमे अपि नियुञ्जीत इत्यर्थः। त्रिखण्डा पदस्य यौगिकतया वा तल्लाभः।

अन्यत्र -

परिवर्तनं नाम हस्तद्वयाङ्गुलिमेलनम्। अङ्गुष्ठौ सरलौ परस्परस्पृष्टौ - तथैव मध्यमे च कुर्यात्। वामानामोपरि दक्षानामां तिर्यक्प्रसार्य तयोरधःप्रदेशात् तर्जनीद्वयमानीय कुटिलाकाराभ्यां तर्जनीभ्यां अनामाऽग्रद्वयं धारयेत्। अनामे अन्तर्गते ययोरिति विग्रहेण लब्धोऽर्थः। अस्या उक्तरीत्या निर्माणे खण्डत्रयं दृश्यते। उपरि सरलाङ्गुष्ठद्वययोगः। मध्ये तादृशमध्यमायोगः। अधश्च कनिष्ठायोगस्तादृशः। एवं सति वामाज्येष्ठारौद्रीकलात्रयरूपं अस्यां स्फुटम्। वामकेश्वरे यद्यपि खण्डद्वयनिर्माणप्रकार उक्तः मध्यमखण्डरचनाप्रकारो नोक्तः। तथाऽपि त्रिखण्डेति योगार्थसम्पत्तये तन्त्रान्तरं शरणीकृत्य खण्डत्रयं संपादनीयम्।

ज्ञानार्णवे -

पाणिद्वये महेशानि परिवर्तनयोगतः।
योजयित्वा तर्जनीभ्यामनामे धारयेत्प्रिये ॥

मध्यमे योजयेन्मध्ये कनिष्ठे तदधस्ततः ।
अङ्गुष्ठावपि संयोज्य त्रिधा युग्मक्रमेण तु ॥
त्रिखण्डा नाम मुद्रेयं त्रिपुराह्वानकर्मणि ॥

वामकेश्वरतन्त्ररीत्या मध्यमायोगस्य स्पष्टमकथनात् द्विखण्डाया एव वामादि कलात्रितयस्वरूपतया वक्ष्यमाणत्वात् त्रिखण्डेति नामास्तु । तन्त्रभेदेन मन्त्रयन्त्रमुद्रादेः भेदस्य बहुशो दर्शनादिति वाच्यम् । अविरोधे सम्भवति विरोधविकल्पयोरन्याय्यत्वात् । अत एव अनामान्तर्गते इत्यत्र बहुव्रीहिः । अनामाभ्यामन्तर्गते इत्यपि केचित् ॥

## सर्वसंक्षोभिणी मुद्रा

सर्वान् पदार्थभूतान् क्षोभयतीति उत्पादयतीति सर्वसंक्षोभिणी कार्यत्वावच्छिन्न कार्यतानिरूपित कारणताऽऽश्रयेति यावत् । इयमेव वामाशक्तिरित्युच्यते ।

योगिनीतन्त्रे -
योनिप्राचुर्यतस्सैषा सर्वसंक्षोभिका पुनः । वामाशक्तिप्रधानेयम् - इति ॥

योनिः कारणत्वानि तेषां प्राचुर्यतो भूयस्त्वेन । अत एव सर्वसंक्षोभिण्या बाह्यस्वरूपे अङ्गुलिग्रथनात्मकेऽपि अङ्गुष्ठे कनिष्ठानामामध्यमाग्राणां योगे योनिभूयस्त्वं प्रत्यक्षेणानुभूयते ॥

वामकेश्वरतन्त्रे -

मध्यमे मध्यगे कृत्वा कनिष्ठाङ्गुष्ठरोधिते।
तर्जन्यौ दण्डवत् कृत्वा मध्यमोपर्यनामिके।
एषा तु प्रथमा मुद्रा सर्वसंक्षोभकारिणी॥

कनिष्ठाङ्गुष्ठयोः अग्रपर्वणी परस्पराभिमुख्येन सम्मेल्य तदुभयपर्वमध्यभागे मध्यमाग्रपर्वापि योजयेत्। कनिष्ठामध्यमाङ्गुष्ठानां अग्रपर्वत्रयं परस्परसंलग्नं कुर्यादिति यावत्। तादृशं हस्तद्वयं संलग्नं कृत्वा दक्षानामिकां वाममध्यमामध्यपर्वोपरि वामानामिकां दक्षमध्यमामध्यपर्वोपरि प्रवेशयेत्। तर्जन्यौ तु सरले एव गगनाभिमुखाग्रे कृत्वा संस्थापयेत्। इदं च मध्यमोपरीति पदस्वारस्याल्लब्धम्। सेयं मुद्रा सर्वसंक्षोभिण्याख्या भवति। एषा तु प्रथमेत्यनेन यत्र मुद्राणां प्रदर्शनं विधीयते तत्रेत आरभ्यैव प्रदर्शयेन्न त्रिखण्डामारभ्येति ध्वन्यते।

ज्ञानार्णवे -

विमुखौ तु करौ कृत्वा मध्यमे मध्यगे कुरु।
अङ्गुष्ठाभ्यां कनिष्ठाभ्यां चाऽऽपीड्य सरले ततः॥
तर्जन्यौ दण्डवत्कुर्यान्मध्यमस्थे ह्यनामिके।
सर्वसंक्षोभिणी मुद्रा त्रैलोक्यक्षोभकारिणी॥

तन्त्रराजे -

कनिष्ठानामिकामध्या नखैरन्योन्यसङ्गताः ।
कृत्वाङ्गुष्ठौ कनिष्ठास्थावृजू कुर्याच्च तर्जनी ।
सर्वसंक्षोभिणी मुद्रा त्रैलोक्यक्षोभकारिणी ॥

प्राञ्चस्तु - मध्यमे मध्यगे एव न तु स्थानान्तरगते कुर्यात्। निजस्थान एव ते वसत इति यावत्। कनिष्ठाङ्गुष्ठरोधिते इत्यनामिकाविशेषणम्। तर्जन्यौ मध्यमोपरि दण्डवत्कुर्यादिति व्याचक्षते। एते पक्षे दूरान्वयः कतिपयपदवैयर्थ्यं तन्त्रान्तरविसंवादश्चेति स्पष्टम्॥

ललितातन्त्रे -

कनिष्ठानामिके मध्ये योजिते पृष्ठपृष्ठके ।
अङ्गुष्ठौ सम्मुखौ योज्य तर्जन्यौ दण्डवत्सृजेत्।
एषा संक्षोभिणीत्यन्या द्राविणी मध्यतर्जनी ॥

नित्योत्सवे -

उत्तानयोः करतलयोः प्रसारिततर्जनीकं संहतकनिष्ठानामामध्यमाग्राणि अन्योन्याभिमुख्येन संयोज्य स्वस्वकनिष्ठोपरि अङ्गुष्ठाग्रसम्बन्धे सर्वसंक्षोभिणी ।

## सर्वविद्राविणी मुद्रा

सर्वानुत्पन्नान् द्रावयति वर्धयति पोषणेन सा सर्वविद्राविणी। सर्वेषां वस्तूनां पालकत्वात् ऋजुस्वभावा ज्येष्ठाशक्तिप्रचुरा च।

योगिनीतन्त्रे -

क्षुब्दविश्वस्थितिकरी ज्येष्ठा प्राचुर्यमास्थिता - इति।

क्षुब्धस्य उत्पन्नस्येत्यर्थः। यश्च संरक्षकः स ऋजुरिति लोके प्रसिद्धा गाथा। अत एव अस्या मुद्रायाः बाह्यरूपेऽपि अङ्गुष्ठेन कनिष्ठिकानामायोगे अङ्गुलिचतुष्टये ऋजुत्वं दृश्यते। एवमाद्यत्रिकोणे रेखात्रयमध्ये पूर्वस्यां दिशि स्थितायां ऋजुरेखायामेव तस्या अधिष्ठानं शास्त्रप्रसिद्धम्।

वामकेश्वरतन्त्रे -

एतस्या एव मुद्राया मध्यमे सरले यदि।<br>
क्रियते चेन्महेशानि सर्वविद्राविणी तदा॥

एतस्याः सर्वसंक्षोभिण्या मध्यमे अपि तर्जनीवत्सरले भवतश्चेदित्यर्थः। न तु मध्यमे एव सरले इति। एतेन तर्जनीमध्यमयोः द्वयोः सरलत्वं ज्ञेयम्॥

ज्ञानार्णवे -

मध्यमे तर्जनीयुक्ते सरले चेत्तदा भवेत्।

सर्वविद्राविणी मुद्रा द्रावयेत्तु चराचरम्॥

गन्धर्वतन्त्रे -

सर्वसंक्षोभमुद्राया मध्यमे सरले यदा।

क्रियते परमेशानि सर्वविद्राविणी तदा॥

नित्योत्सवे -

संक्षोभिण्यैव प्रसारितमध्यमाऽपि सर्वविद्राविणी।

## सर्वाकर्षिणी मुद्रा

सर्वाकर्षिणी सर्वाकर्षणशीला। इयं ज्येष्ठावामोभयात्मिका।

योगिनीतन्त्रे -

ज्येष्ठावामासमत्वेन सृष्टेः प्राधान्यमास्थिता। आकर्षिणीति मुद्रेयं - इति॥

पूर्वोक्त मुद्राद्वयवाचकपदशक्त्या अवच्छेदकयोः द्वयोरपि सर्वाकर्षिणी पदशक्त्या अवच्छेदकत्वं बोध्यम्। तत्रापि ज्येष्ठात्वावशिष्टवामात्वं शक्त्याऽवच्छेदकं न तु

विपरीतम्। तथा सति ज्येष्ठाया विशेष्यत्वेन प्राधान्यं वाच्यम्। प्राधान्ये ज्येष्ठाया अतिसरलत्वेन प्रधानानुसारेण विशेषणीभूत वामाया अपि प्रधानानुवर्तिन्याः सरलतया तर्जनीमध्यमयोः बाह्यरूपे कुटिलत्वं न स्यात्। वामायाः प्राधान्ये तु तस्याः कुटिलतया तदनुसारेण अप्रधानाया ज्येष्ठायाः प्रधानानुवर्तिन्याः कुटिलत्वं युक्तम्। अत एव बाह्यस्वरूपे अङ्गुलिग्रथने सर्वाङ्गुलिषु कुटिलत्वम्।

मध्यमातर्जनीभ्यां तु कनिष्ठानामिके समे।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षकारिणी॥

सर्वविद्राविण्यामेव तर्जन्योः मध्यमयोश्च आकुञ्चिताग्रत्वे सर्वाकर्षिणी मुद्रा भवति।

ज्ञानार्णवे -
मध्यमातर्जनीयुग्मे वक्रे कुर्यात्सुलोचने।
एतस्या एव मुद्रायाः तदाऽऽकर्षणकारिणी॥

अत्र मध्यमातर्जनीभ्यामिति तृतीयेत्थंभूतलक्षणे। वक्राभ्यां ताभ्यामुपलक्षिता मुद्रेत्यन्वयः। कनिष्ठानामिके तु समे। पूर्वमुद्रास्थाभ्यां स्वाभ्यामेव तुल्ये। मध्यम इति तु परमेश्वर्या विशेषणम्। एतासां मुद्राणां मध्ये वासनारूपेण वामादि शक्तिरूपतया

अवस्थित इत्यर्थः। अन्ये तु एतस्या एव मुद्राया इत्यनुवर्त्य कनिष्ठानामिके मुद्रामध्यगे मध्यमातर्जनीभ्यां समे च कार्ये इति योजयन्ति। अत्र साम्यं प्रमेयत्वादिनैव निर्वाह्यं वक्रत्वेन साम्ये तु कनिष्ठिकानामिके अप्याकुञ्चयेदिति विध्यर्थः स्यात्॥

ललितातन्त्रे -

द्राविण्या मध्यतर्जाग्रे अन्तराकुञ्चयेच्छनैः।

मुद्रैषाऽऽकर्षिणी प्रोक्ता इति॥

नित्योत्सवे -

विद्राविण्यैव मध्यमातर्जन्योः आकुञ्चने सर्वाकर्षिणी।

## सर्ववशङ्करी मुद्रा

सर्वान् क्षित्यादिशिवान्तान् वश्यं स्वाधीनं नयति प्रापयतीति सर्ववश्यकरी। लोके आकाशो द्विविधः दह्रः प्राकृतश्च। दह्राकाशेऽपि सुसूक्ष्मोऽन्य आकाशोऽस्ति - तस्यान्ते सुषिरं सूक्ष्मं - इति श्रुतिप्रसिद्धः। तन्मध्ये गाढमाश्लिष्टा परशिवेन या आनन्दविग्रहा मूर्तिः सा सर्ववश्यकरी पदवाच्या।

उत्तरचतुश्शत्याम् -

व्योमद्वयान्तरालस्थ बिन्दुरूपा महेश्वरी।

शिवशक्त्यात्मसंश्लेषादेषा वश्यकरी स्मृता ॥

बिन्दुरूपेति कथनात् स्वरूपमपि तथा। अत एवाङ्गुलिग्रथनेऽपि अस्या बाह्यरूपे बिन्द्वाकारता सर्वाङ्गुलीनां गाढसंश्लेषोऽपि व्यक्तः।

वामकेश्वरतन्त्रे -

पुटाकारौ करौ कृत्वा तर्जन्यावङ्कुशाकृती।
परिवर्त्य क्रमेणैव मध्यमे तदधोगते ॥
क्रमेण देवि तेनैव कनिष्ठानामिके अपि।
संयोज्य निबिडाः सर्वा अङ्गुष्ठावग्रदेशतः।
मुद्रेयं परमेशानि सर्वावेशकरी स्मृता ॥

करयोः पुटाकारतोक्तिः परस्पर पराङ्मुखत्व सिद्ध्यर्था। अन्यथा अदृष्टार्थापत्तेः। एवं पराङ्मुखौ परिवर्त्य एतत् परस्परान्तः प्रवेशिताङ्गुलिकौ कुर्यात्। ततस्तर्जन्यौ परस्पराभिमुख्येन कुञ्चिताग्रे कार्ये। तदधो मध्यमे तदधो अनामिके तदधः कनिष्ठिके अपि तेनैव क्रमेण  अङ्कुशाकारता क्रमेण संयोज्य निबिडाः सान्द्रा निरवकाशा अङ्गुलीः कृत्वा सर्वोर्ध्वमङ्गुष्ठौ न्युब्जौ निदध्यात्। सेयं मुद्रा सर्वावेशकरी सर्ववश्यकरीत्यप्युच्यते ॥

अन्यत्र -

पुटाकारौ परस्परं पृष्ठसंलग्नौ ऊर्ध्वाग्राङ्गुलिकौ हस्तौ कृत्वा ततः अङ्गुष्ठव्यतिरिक्ताङ्गुल्यः परस्परमङ्गुलिसन्धिषु प्रवेश्य तर्जन्यादिकनिष्ठान्ता अङ्गुल्यः अङ्कुशाकाराः कुर्यात्। एवं कृत्वा ततः अङ्गुष्ठद्वयं अधोमुखं तर्जन्युपरि स्थापयेत्।

ललितातन्त्रे -

कनिष्ठेऽनामिके मध्ये स्वपृष्ठविवरे क्षिपेत्।

तलाभ्यां गृह्य तर्जाग्रे अङ्गुष्ठाग्रे नियोजयेत्॥

नित्योत्सवे -

परस्परग्रथिताङ्गुलि स्पृष्टनखाग्राङ्गुष्ठयोः मुष्ट्योः योगे सर्ववशङ्करी।

## सर्वोन्मादिनी मुद्रा

उक्तशिवशक्तिबिन्द्वोर्मध्ये सूक्ष्मरेखा - नीवारशूकवत्तन्वी तस्य मध्ये वह्निशिखा - इति श्रुतिप्रसिद्धा। तस्याः शिखायाः द्विस्वभावत्वं ज्येष्ठास्वभावत्वं च। यथा लोके एकस्यैव दण्डस्य घटोत्पादकशक्तिमत्त्वं तन्नाशकशक्तिमत्त्वं चास्ति तथाऽपि स दण्डः कदाचिदुत्पादकशक्तिप्रधानो भूत्वा घटमुत्पादयति कदाचिन्नाशशक्तिप्रधानः तं नाशयति। एवं लोके बहुस्थले दृष्टम्। तथा दण्डस्थानीया उक्तरेखा। सा यदा जगद्रक्षणकर्तृत्वविशिष्ट ज्येष्ठाशक्तिप्रधाना तदा सर्वोन्मादिनी पदवाच्या।

उत्तरचतुश्शत्याम् -

बिन्द्वन्तरालविलसत्सूक्ष्मरूपशिखामयी ।
ज्येष्ठाशक्तिप्रधाना तु सर्वोन्मादनकारिणी ॥

अत एव तदङ्गुलिग्रथनवेलायां अङ्गुष्ठानामतर्जन्यः सरलाः दृश्यन्ते बिन्दुद्वयाकारं मध्यमाद्वयं च भवति । तत्रापि निरुक्तशिखास्थानापन्न ग्रहनवेलायां अनामाद्वयमेव ज्ञेयम् । मध्यमाद्वयस्य तदानीं बिन्दुद्वयरूपत्वेन तन्मध्यवर्त्यनामाद्वयस्य - तस्य मध्ये वह्निशिखा - इति प्रसिद्धशिखात्वं युक्तम् ।

वामकेश्वरतन्त्रे -

सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेऽनुजे ।
अनामिके तु सरले तद्बहिस्तर्जनीद्वयम् ॥
दण्डाकारौ ततोऽङ्गुष्ठौ मध्यमानखदेशगौ ।
मुद्रैषोन्मादिनी नाम क्लेदिनी सर्वयोषिताम् ॥

दक्षकनिष्ठां वाममध्यमया वामकनिष्ठां च दक्षमध्यमया दृढं गृह्णीयात् । तद्ग्रहणं च द्वेधा सम्भवति अनामिकयोरुत्तानकनिष्ठिकोर्ध्वं अवस्थापनेन तदधो अवस्थापनेन चेति । तत्र द्वितीयपक्षानुमतिद्योतनाय करौ सम्मुखौ कृत्वेत्युक्तम् । अनामिकयोः परस्पराभिमुख्येन संलग्नताया अस्मिन्नेव पक्षे संरक्षणात् । मध्यगेऽनुजे इत्यत्र सन्धिरर्थः । अनुजे

कनिष्ठिके। अनुजशब्दः सतीसप्तम्येकवचनान्तो वा। ततो अनामाद्वयं सरलं तद्बहिः तत्पार्श्वयोर्दूरेतनीद्वयमपि सरलम्। मध्यमयोः आकुञ्चिताग्रयोः नखोपरि न्युब्जौ दण्डाकारावङ्गुष्ठौ चेदेषा सर्वोन्मादिनी नाम मुद्रा भवति॥

अन्यत्र -

वामकनिष्ठोपरि दक्षकनिष्ठां तिर्यगनामाद्वयोपरि मार्गेण मध्यमापर्यन्तं प्रसार्य तादृशकनिष्ठाऽग्रद्वयं मध्यमाद्वयेन दृढं गृह्णीयात्। गृहीतमध्यमानखोपरि दण्डाकारमङ्गुष्ठद्वयं स्थापयेत्। तथाऽनामाद्वयं परस्पराभिमुख्येन सरले कुर्यात्। अनामिकयोः पार्श्वद्वये तर्जनीद्वयमपि सरलं कुर्यात्। एषा सर्वोन्मादनिका मुद्रा।

ललितातन्त्रे -

अङ्गुल्यन्तः कनिष्ठे द्वे व्यत्यस्याकर्षयेच्छनैः।
ते मध्यमाभ्यामावेष्ट्य मध्याग्राङ्गुष्ठयोगतः॥
विरले सर्जयेत्तर्जमुद्रैषोन्मादिनी मता॥

नित्योत्सवे -

अधरोत्तरं तिर्यक्प्रसारिते वामदक्षिणकनिष्ठे मध्यमाभ्यां धृत्वा तयोरग्रे अङ्गुष्ठाभ्यां निपीड्य अनामातर्जन्यग्राणां पार्श्वतो मिथः संस्पर्शे सर्वोन्मादिनी।

## सर्वमहाङ्कुशा मुद्रा

पूर्वोक्तं शिखाद्वयं यदा वामाप्रधानं तदा सर्वमहाङ्कुशा। सूक्ष्मरूपेण परमशिवकुक्षौ स्थितं जगत्। यथा अन्तस्थौ गजः अङ्कुशेन बहिराकृष्यते तथा सर्वस्य बहिराकर्षणात् सर्वमहाङ्कुशेत्युच्यते। परशिवकुक्षिस्थ जगतो वमनात् वामा तत्प्रधाना शिखा सर्वमहाङ्कुशा इत्युच्यते।

योगिनीतन्त्रे -

वामाशक्तिप्रधाना तु महाङ्कुशमयी पुनः।
तद्वद्विश्वं वमन्ती सा द्वितीये तु दशारके॥

अत एव पूर्वमुद्रायां सरलयोरनामयोः वक्रता दृश्यते। लोके वमनवेलायां मानवो धनुराकारो वक्रो भवति। अत्रायं विवेकः - केवलवामात्वं सर्वसंक्षोभिणीपदप्रवृत्तिनिमित्तं ज्येष्ठाविशिष्टवामात्वं सर्वाकर्षिणीपदप्रवृत्तिनिमित्तं सूक्ष्माकाशान्तर्वृत्तिबिन्दुद्वयत्वं सर्ववश्यकरपदप्रवृत्तिनिमित्तं ज्येष्ठाशक्तिप्रधानक बिन्दुद्वयमध्यवृत्तिरेखात्वं सर्वोन्मादिनीपदशक्त्याऽवच्छेदकं वामाशक्तिप्रधानत्वं सर्वमहाङ्कुशापदशक्यताऽवच्छेदकं एवं रीत्या वैलक्षण्यं सूक्ष्मधिया द्रष्टव्यम्।

वामकेश्वरतन्त्रे -

अस्यास्त्वनामिकायुग्ममधः कृत्वाङ्कुशाकृति।

तर्जन्यावपि तेनैव क्रमेण विनियोजयेत्।

इयः महाङ्कुशा मुद्रा सर्वकार्यार्थसाधिनी॥

अस्या उन्मादिनीमुद्राया अनामिकायुगमङ्कुशाकारं कृत्वा तर्जन्यावपि तेनैवाङ्कुशाकाररूपेणैव क्रमेण योजयेत्। सेयं महाङ्कुशा नाम मुद्रा भवति॥

ललितातन्त्रे -

अस्यास्त्वनामतर्जाग्रे सम्मुख्याकुञ्चनात्ततः। एवं महाङ्कुशा मुद्रा इति॥

नित्योत्सवे -

उन्मादिन्यैव अनामयोराकुञ्चने तर्जन्योः किञ्चित् भुग्ने च सर्वमहाङ्कुशा।

## सर्वखेचरी मुद्रा

सर्वखेचरी जीवानां स्वकर्मजनित रोगादि दुःखनाशनक्षमा शक्तिः। अत एव सर्वरोगहरचक्रस्था भवति।

योगिनीतन्त्रे -

धर्माधर्मस्य संघट्टादुत्थिता वित्तिरूपिणी।

विकल्पोत्थक्रियालोपरूपदोषविघातिनी।

विकल्परूपरोगाणां हारिणी खेचरी मता ॥

धर्मः शक्तिः परशिववृत्तित्वात्। न विद्यते धर्मो यत्रेति अधर्मः परं ब्रह्म परशिवः। तयोः संघट्टः मेलनं तेन उत्थिता। यावद्विकल्पः तेनोत्थिताः याः क्रियाः नित्यनैमित्तिकाः तासां लोपेन यत्पापं तत्सम्भवाः रोगाः तन्नाशिनी खेचरीति। अत एव एतादृश शिवशक्तिसामरस्यद्योतकं बाह्यरूपे बाहुद्वयपरिवर्तनम्।

वामकेश्वरतन्त्रे -
सव्यं दक्षिणहस्ते तु दक्षिणं सव्यहस्ततः।
बाहू कृत्वा महेशानि हस्तौ संपरिवर्त्य च ॥
कनिष्ठानामिके देवि युक्त्वा तेन क्रमेण तु।
तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे ॥
अङ्गुष्ठौ तु महेशानि कारयेत्सरलावपि।
इयं सा खेचरी नाम मुद्रा सर्वोत्तमा प्रिये ॥

वामबाहुं दक्षभुजोपरि दक्षं हस्तं परिवेष्टनक्रमेण वामहस्तोपर्यानीय मिथः प्रवेशिताङ्गुलिकौ कृत्वा दक्षतर्जन्या वामे कनिष्ठानामे वामतर्जन्या दक्षे कनिष्ठानामे गृह्णीयात्। मध्यमे ति सर्वोर्ध्वे सरले एव स्थापयेत्। सेयं खेचरी नाम मुद्रा भवति।

अन्यत्र -

बाहू सरलौ प्रथमं कृत्वा दक्षबाहूपरि वामं स्थापयित्वा पुनर्वामं हस्तं दक्षहस्ताधो मार्गेण वामपार्श्वे निर्गमय्य हस्तद्वयाङ्गुलीः वक्ष्यमाणरीत्या ग्रथ्नीयात्। तद्यथा वामानामाकनिष्ठे दक्षमध्यमाधो मार्गेण दक्षतर्जन्यां नीत्वा एवं दक्षानामाकनिष्ठे दृढं गृह्णीयात्। मध्यमे सर्वोर्ध्वं सरले एवाग्राभ्यां परस्परसंलग्ने स्थापयेत्। अङ्गुष्ठौ सरलौ कृत्वा योनिसादृश्यं सम्पादयेत्। इयं खेचरीमुद्रा।

ज्ञानार्णवे -

वामं भुजं दक्षभुजे दक्षिणं वामदेशतः।
निवेश्य योजयेत्पश्चात्परिवर्त्य क्रमेण हि॥
कनिष्ठानामिकायुग्मे तर्जनीभ्यां निरोधयेत्।
मध्यमे सरले कृत्वा योनिवत्सरलौ ततः।
अङ्गुष्ठौ खेचरीमुद्रा पार्थिवस्थानयोजिता॥

तन्त्रराजे -

सव्यदक्षकरौ सम्यग्व्यत्यसेत्कूर्परौ ततः।
मणिबन्धौ च बध्नीयादङ्गलिं मध्यपृष्ठयोः॥
विधाय भुग्ने तर्जन्यावङ्गुष्ठौ कारयेदधः।
कनिष्ठानामिके कुर्याद्व्यत्यस्ते करपृष्ठगे।

इयं सा खेचरीमुद्रा ललिता प्रीतिकारिणी ॥

नित्योत्सवे -

दक्षभुजमध्यसन्धिस्थापित वामकूर्परं आमनिबन्धं पाणी परिवर्त्य स्वाभिमुखमन्योन्यस्पृष्टाग्रयोः मध्यमयोः पृष्ठतोऽधरोत्तरं तिरः प्रसारितानि दक्षवामानामा कनिष्ठाग्राणि तर्जनीभ्यां धृत्वा पुरोऽङ्गुष्ठयोः अन्योन्यसम्बन्धे सर्वखेचरी ।

**खेचरी माहात्म्यम्**

रचितेयं महादेवि सर्वतेजोपहारिणी ।

बद्धयैवैतया देवि दृश्यते साधकोत्तमः ॥

योगिनीसर्ववृन्दैस्तु ज्वलत्पावकसन्निभः ।

डाकिनीराकिणीवृन्दैः लाकिनीकाकिनीगणैः ॥

साकिनीहाकिनीभिस्तु ध्यातेयं परमेश्वरि ।

एतया ज्ञातया देवि योगिनीनां भवेत्प्रियः ।

यतः समयमुद्रेयं सर्वासां परिकीर्तिता ॥

एष खेचरीमुद्राबन्धो यतः सर्वासां शक्तीनां समयबन्धरूपः तस्मादेतद्भवनेन सर्वतेजोपहारादिकमेतत् ज्ञानेन देवतावल्लभत्वादिकं च भवतीत्यर्थः । समयः सङ्केतः । यो यत्सङ्केतज्ञः स तत्कूटान्तर्भावीति व्याप्तेरिति भावः । अस्या एव मुद्राया मध्यमयोः

सरलतां निरस्य परिवर्तनं कृत्वा पार्थिवस्थाने योजयेत्। तावतैव खेचरत्वसिद्धिः। ज्ञानार्णवमते तु पार्थिवस्थानयोगः खेचरीशरीरघटकत्वान्नित्यो वामकेश्वरमते तु काम्य इति विशेषः। पार्थिवस्थानं नाम मूर्धस्थितमहाबिन्दुस्थानमित्याहुः।

## सर्वबीजमुद्रा

सर्वबीजस्थानापन्नत्वात् सर्वबीजा। जगतः षट् विकारेषु प्राथमिको यो भावविकारः सूक्ष्मरूपेण सत्ता तदभिमानिनी शक्तिः बीजमुद्रेत्युच्यते।

उत्तरचतुश्शत्याम् -

शिवशक्तिसमाश्लेषस्पुरद्व्योमान्तरे पुनः।

प्रकाशयन्ती विश्वं सा सूक्ष्मरूपस्थितं सदा।

बीजरूपा महामुद्रा इति॥

वटबीजे सुसूक्ष्मेऽपि किञ्चिदाकाशोऽस्ति विभुत्वात्। तस्मिन् यथा महावृक्षः सूक्ष्मरूपेण तिष्ठति तथा षट् त्रिंशत्तत्त्वानि शिवशक्तिगर्भे विद्यन्ते सूक्ष्मरूपेण। सैव सत्ता घटोऽस्ति पटोऽस्ति इत्यत्र अनुवर्तते। सा बीजमुद्रेत्यर्थः। सूक्ष्मत्वादेव अङ्गुलिप्रग्रथनवेलायां संक्षोभिण्याद्यपेक्षया अल्पयोनित्वं सूक्ष्मत्वज्ञापकम्।

वामकेश्वरतन्त्रे -

परिवर्त्य करौ स्पष्टावर्धचन्द्राकृती प्रिये ।
तर्जन्यङ्गुष्ठयुगलं युगपत्कारयेत्ततः ॥
अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्वाधस्तादनामिके ।
बीजमुद्रेयमचिरात्सर्वसिद्धिप्रवर्तिनी ॥

आदौ मिथः स्पृष्टयोः करयोः परस्परान्तः प्रवेशिताङ्गुलिकत्वरूपं परिवर्तनं कुर्यात् । ततः तर्जन्यङ्गुष्ठयुगलं अर्धचन्द्राकृति कुर्यात् गलहस्तितवदिति यावत् । युगपदित्यनेन युगलद्वयमपि तथा रचयेदिति लभ्यते । ततः स्वाधोभागे कनिष्ठिकाभ्यामवष्टब्धे कृत्वा मध्यमे अर्थादग्रभागे योजयेत् । मध्यमानामिकासन्धिद्वये कनिष्ठिकाग्रद्वयं विनियमेन प्रवेश्य मध्यमयोः परस्परनखाग्रस्पर्शं कारयेदिति यावत् । ततः सर्वाधस्ताद्भागे अनामिके वक्रे कृत्वा यथा सौख्यं भवति तथैव व्यत्यस्ते योज्ये । सेयं बीजाख्या मुद्रा ॥

अन्यत्र -

अनामामध्यमार्गेण व्यत्यस्ते कनिष्ठिके स्वाधोभागे मध्यमा यथा तिष्ठति तथा कुर्यात् । ततो मध्यमाद्वयं कनिष्ठिकाद्वयावष्टम्भकं यथा तथा कुर्यात् । सर्वाधःस्थिते अनामे यावत्कुटिले भवतः तावत् कुर्यात् । अङ्गुष्ठतर्जनीयुगलं अर्धचन्द्राकृति यथा भवति तथा योजयेत् । इयं बीजमुद्राभवति ।

तन्त्रराजे -

मध्यमामध्यपार्श्वाधः कनिष्ठाग्रे विपर्ययात्।
अनामिकेऽधो व्यत्यस्ते तर्जन्यावङ्कुशाकृती।
इतरे तन्नखाग्राग्रे बीजमुद्रेयमीरिता॥

केचित्तु कनिष्ठिकाभ्यामवष्टब्धे मध्यमे अधो विनियोजयेदिति वदन्तः तर्जनीमध्यमयोः सन्धौ कनिष्ठिकाप्रवेशनं मन्यते। परे तु मध्यमावष्टब्धे कनिष्ठिके इति व्याचक्षमाणाः कनिष्ठावष्टब्धपदे बहुव्रीहिं मन्यमाना मध्यमाद्वयेन आकुञ्चितेन कनिष्ठिकायुगलं गर्भीकुर्यादिति मेनिरे। तदुभयमपि तन्त्रान्तरविसंवादात् अनादृत्यम्।

ज्ञानार्णवे -

परिवर्त्याञ्जलिं कृत्वा कनिष्ठाग्रगते ततः।
मध्यमे स्थापयेद्देवि कनिष्ठे धारयेत्ततः॥
अनामिकाभ्यां सुदृढं तर्जनीमध्यमायुगम्।
अङ्गुष्ठाभ्यां समायोज्यमर्धचन्द्राकृति प्रिये।
बीजमुद्रेयमाख्याता सर्वानन्दकरी शिवे॥

नित्योत्सवे -

ऊर्ध्वाधस्तिरः प्रसृते वामदक्षकनिष्ठाग्रे अनामाभ्यां धृत्वा अर्धचन्द्राकृतियोजितेषु तर्जन्यङ्गुष्ठेषु मिथः श्लिष्टाभ्यां ऋजुभ्यां मध्यमाभ्यां तर्जन्योः सम्बन्धे सर्वबीजम्।

## सर्वयोनिमुद्रा

शक्तिविशिष्टे प्रकाशरूपे परशिवे शक्तिमपहाय केवलस्वरूपमात्रनिष्कर्षणे सति तुरीयबिन्दुपदवाच्यत्वं यथा जलनिष्ठं द्रवत्वमपहाय स्वरूपमात्रनिष्कर्षणे जलपदवाच्यत्वम्। तस्य शुद्धशिवस्य शक्तिसम्बन्धित्वेन विवक्षायां कामबिन्दुपदवाच्यता। तस्यैव सम्बन्धस्याभेदत्वेन शक्यताऽवच्छेदक कोटिप्रवेशे विसर्गो हकारः विमर्शः इति तान्त्रिकव्यवहारः। तादृश सामरस्योत्तरं रक्तशुक्लबिन्दुमिश्रणेन आविर्भूतानन्दान्तर्भावेण विवक्षायां कलेत्युच्यते। ईदृश कलारूपा योनिमुद्रा।

नित्याहृदये -

सम्पूर्णस्य प्रकाशस्य लाभभूमिरियं पुनः।<br>
योनिमुद्रा कलरूपा इति ॥

वामकेश्वरतन्त्रे -

मध्यमे कुटिलाकारस्तर्जन्युपरिसंस्थिते।<br>
अनामिकामध्यगते तथैव हि कनिष्ठिके ॥

सर्वा एकत्र संयोज्या अङ्गुष्ठपरिपीडिताः।
एषा तु प्रथमा मुद्रा योनिमुद्रेति या स्थिता॥

तर्जन्यौ कुटिलाकारौ अङ्कुशाविव कृत्वा तादृशतर्जन्यग्रयोरुपरि मध्यमे उत्ताने निक्षिपेत्। ततः कनिष्ठिके व्यत्यस्ते कृत्वा अनामिकाभ्यां गृह्णीयात्। एवं अनामाकनिष्ठाचतुष्टयं एकीकृत्य अङ्गुष्ठाभ्यां निरुन्ध्यात्। अनामिकयोः नखोपरि अङ्गुष्ठौ न्युब्जौ निदध्यादिति यावत्। यद्यपि अक्षरस्वारस्यादीदृश एवार्थो लभ्यते तन्त्रभेदात् मुद्राभेदो न दोषायेत्यपि सुवचं तथाऽपि तन्त्रान्तरसंवादायानामिके मध्यगते वयोस्ते इति बहुव्रीहिरेव युक्तः। तत्श्चानामिके व्यत्यस्ते कृत्वा अङ्कुशाकार तर्जन्युत्तानमध्यमयोः मध्ये प्रवेशयेत्। तयोरधः कनिष्ठिके व्यत्यस्ते अनामिकापृष्ठसंलग्ने स्थापयेत्। अङ्गुष्ठपीडनं तु मध्यमामध्यपर्वणोरिति सिद्ध्यति।

तन्त्रराजे -
कनिष्ठाङ्गुष्ठसंश्लेशान्महायोनिस्त्रिखण्डिका॥

ज्ञानार्णवे -
परिवर्त्य करौ सम्यक्तर्जनीवाहिनी समे।
मध्यमे कुरु तन्मध्ये योजयेत्तदनन्तरम्॥
अन्योन्यानामिके देवि कनिष्ठे तु यथा स्थिते।

अङ्गुष्ठाभ्यां योजिताभ्यां योन्याकारं तु कल्पयेत्।

योनिमुद्रेयमाख्याता परा त्रैलोक्यमातृका ॥

इयमेव हृदि क्षिप्ता त्रैलोक्यक्षोभिणी भवेत्।

त्रैलोक्यद्राविणी नाम मुखस्था परमेश्वरि ॥

भ्रूमध्यस्था महादेवि त्रैलोक्याकर्षिणी भवेत्।

ललाटस्था महादेवि त्रैलोक्यवशकारिणी ॥

ब्रह्मरन्ध्रस्थिता देवि त्रैलोक्योन्मादकारिणी।

पञ्चमुद्रामयीं मुद्रां योनिमुद्रां च दर्शयेत् ॥

नित्योत्सवे -

तिर्यङ्मिलिताग्रयोः मध्यमयोः पश्चात् ऊर्ध्वाधःस्थिते वामदक्षानामिके तिरः प्रसारिते तर्जनीभ्यां निपीड्य वामकनिष्ठां दक्षिणया धृत्वा अङ्गुष्ठाग्रयोः मध्यमापुरो मध्यपर्वद्वयसम्बन्धे योनिः।

अस्या नवम्याः प्रथमत्वेन कीर्तनं कथमित्याशङ्का बहुधा समादधते। तत्र प्रथमा प्रथमकीर्तनीया। सर्वोत्तमत्वादित्यर्थ इति केचित्। परे तु बहिर्यागे सर्वसंक्षोभिणीमुद्रायाः प्राथम्यं अन्तर्यागे तु योनिमुद्राया एवेति व्यवस्थाप्रदर्शनार्थमित्याहुः। यद्वा चक्रनिर्माणे बिन्दोः प्रथममुत्पन्नत्वाद्बिन्दुचक्रे प्रदर्शनीयत्वादस्याः प्राथम्यम्।

एका चैषा महामुद्रा योनिमुद्रात्वमागता।
तया विभक्तः स्वात्मा तु संक्षोभादि प्रभेदतः॥

इत्यभियुक्तोक्त्या स्वेतर मुद्राजनकत्वात् प्राथम्यमित्यप्याहुः। अथवा प्रथमपदेन देव्येव कथ्यते। अहमस्मि प्रथमजा ऋतस्येति श्रुतेः। पूर्वजा त्रिपुराम्बिकेति स्मृतेश्च। तत्र जननांशे गौणत्वात्सर्वकारणार्थकं प्रथमादिपदमेव तद्वाचकमिति निर्विवादम्। ततश्चैषा मुद्रा प्रथमैव देवीस्वरूपैवेत्यर्थः॥

## शंखमुद्रा

राघवभट्टस्तु -
वामाङ्गुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना।
कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत्॥
वामाङ्गुल्यस्तथाऽऽश्लिष्टाः संयुक्ताः संप्रसारिताः।
दक्षिणाङ्गुष्ठसंस्पृष्टा मुद्रैषा शङ्खसंज्ञका॥

कालीकुलार्णवे -
वाममुष्ट्यन्तरेऽङ्गुष्ठं नियोज्य सरलाङ्गुलीः।
दक्षिणस्य करस्यैव वामाङ्गुष्ठेन संस्पृशेत्।
शङ्खमुद्रेयमाख्याता मन्त्रविद्भिरनुत्तमा॥

## चक्रमुद्रा

वाराहीतन्त्रे -

हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सुप्रसारितौ।

कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञका॥

नित्योत्सवे -

व्यत्ययेन वामदक्षकर कनिष्ठाङ्गुष्ठाग्रयोः योगे अन्यासां वैरल्येन प्रसारणे च चक्रम्।

## तार्क्ष्यमुद्रा

ऊर्ध्वाम्नायतन्त्रे -

हस्तौ तु विमुखौ कृत्वा ग्रन्थयित्वा कनिष्ठिके।

मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा॥

मध्यमेऽनामिके द्वे तु द्वौ पक्षाविव चालयेत्।

एषा गरुडमुद्राख्या विष्णोः सन्तोषकारिणी॥

चण्डीकल्पे -

ऊर्ध्वतो दक्षपृष्ठं तु वामपृष्ठे नियोजयेत्।

तर्जन्यौ च कनिष्ठे च वेष्टिते तु परस्परम्॥

मध्यमानामिके वक्रे चाङ्गुष्ठे चोर्ध्वयोजिते ।
ताक्ष्र्यमुद्रेयमाख्याता निर्विषीकरणे शिवे ॥

## चापमुद्रा

हयशीर्षसंहितायाम् -

वामस्य मध्यमाग्रं तु तर्जन्यग्रेण योजयेत् ।
अनामिकां कनिष्ठां च तस्याङ्गुष्ठेन पीडयेत् ।
दर्शयेद्वामके स्कन्धे धनुर्मुद्रेयमीरिता ॥

ज्ञानार्णवे -

यथा हस्तगतं चापं तथा हस्तं प्रिये कुरु ।
चापमुद्रेयमाख्याता वामहस्ते त्ववस्थिता ।
कल्पद्रुमा धनुर्मुद्रा यशःकीर्तिविवर्धिनी ॥

## बाणमुद्रा

तारिणीकल्पे -

दक्षमुष्टेस्तुतर्जन्या दीर्घया बाणमुद्रिका ॥

ज्ञानार्णवे -

यथा हस्तगतो बाणस्तथा हस्तं कुरु प्रिये ।

बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तिनी ॥

## मृगी मुद्रा

आगमरहस्ये -

मिलित्वानामिकाङ्गुष्ठमध्यमाग्राणि योजयेत् ।

शिष्टाङ्गुल्युच्छ्रिते कुर्यान्मृगीमुद्रेयमीरिता ॥

## पाशमुद्रा

रुद्रयामले -

वाममुष्टिस्थतर्जन्या दक्षमुष्टिस्थतर्जनीम् ।

संयोज्याङ्गुष्ठकाग्रे तु तर्जन्यग्रे स्वके क्षिपेत् ।

एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता ॥

नित्यातन्त्रे -

तर्जन्यङ्गुष्ठकौ कृत्वा सक्ताग्रौ कुञ्चिता परा ।

पाशमुद्रेयमाख्याता त्रैलोक्यक्षोभिणी परा ॥

ज्ञानार्णवे -

तर्जनीयुगलं देवि वामाम्से शृङ्खलाकृति ।

पाशमुद्रा समाख्याता त्रैलोक्याकर्षणक्षमा ॥

## अङ्कुशमुद्रा

राघवभट्टस्तु -

ऋज्वीं च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि ।

संयोज्याकुञ्चयेत् किञ्चिन्मुद्रैषाऽङ्कुशसंज्ञिका ॥

ज्ञानार्णवे -

मुष्टिं बद्ध्वा दक्षकरे तर्जन्यङ्कुशरूपिणी ।

अङ्कुशाख्या महामुद्रा त्रैलोक्याकर्षिणी भवेत् ॥

नित्योत्सवे -

उदग्रायां दक्षमध्यमायां तन्मध्यपर्वस्पर्शि मध्यपर्वणस्तर्जन्याकुञ्चने अनामाकनिष्ठाग्रयोश्च अङ्गुष्ठाग्रनिपीडने अङ्कुशः ।

## गालिनी मुद्रा

रुद्रयामले -

कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।

तर्जनीमध्यमानामाः संहता भुग्नवर्जिताः।

मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता॥

नित्योत्सवे -

उत्तानस्य वामकरस्य विरलं आकुञ्चितैः अनामामध्यमातर्जन्यग्रैः अधोमुखस्य दक्षस्य वक्रीकृतानि तानि संयोज्य कनिष्ठाङ्गुष्ठाग्राणां मिथः सम्बन्धे गालिनी।

## प्रार्थना मुद्रा

मुद्राप्रकाशे -

प्रसृताङ्गुलिकौ हस्तौ मिथः श्लिष्टौ तु सम्मुखौ।

कुर्यात् स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका॥

नित्योत्सवे -

उदङ्गुलिनोः करतलयोः योजने वन्दनम्।

## संहारमुद्रा

बडबानलतन्त्रे -

अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम्।

क्षिप्त्वाऽङ्गुलीरङ्गुलीभिः संग्रथ्य परिवर्तयेत्।

एषा संहारमुद्रा स्याद्विसर्जनविधौ स्मृता ॥

## मत्स्यमुद्रा

श्रीगर्भकुलार्णवे -

दक्षपाणिपृष्ठदेशे वामपाणितलं क्षिपेत् ।

अङ्गुष्ठौ चालयेत् सम्यग्मुद्रेयं मत्स्यरूपिणी ॥

चण्डीकल्पे -

दक्षपाणितलं देवि वामपृष्ठोपरि न्यसेत् ।

अङ्गुष्ठद्वितयं सम्यकृजुरूपमधोमुखम् ।

मत्स्यमुद्रेयमाख्याता मण्डलादि प्रकल्पने ॥

नित्योत्सवे -

अधोमुखप्रसारितं वामदक्षकरतलयुगं अधरोत्तरं विधाय अङ्गुष्ठद्वयचालने मत्स्यः ।

## परसौभाग्यदण्डिनी मुद्रा

वामकेश्वरतन्त्रे -

तर्जनीं सरलां कृत्वा भ्रामयेन्मनुवित्तमः ।

सौभाग्यदण्डिनी मुद्रा न्यासकालेऽपि सूचिता ॥

नित्योत्सवे -

वामहस्तमुष्टिं बद्ध्वा सरलया तर्जन्या अंसकर्णमभितो भ्रामणे सौभाग्यदण्डिनी।

## रिपुजिह्वाग्रहा मुद्रा

वामकेश्वरतन्त्रे -

अन्तरङ्गुष्ठमुष्ट्या तु निबद्धय तर्जनीमिमाम्।

रिपुजिह्वाग्रहा मुद्रा न्यासकाले च सूचिता॥

नित्योत्सवे -

सौभाग्यदण्डिन्यैव गर्भिताङ्गुष्ठ वामपादतलं न्यस्ता रिपुजिह्वाग्रहा।

## तत्त्वमुद्रा

कालीकुलार्णवे -

अङ्गुष्ठानामिकायोगाद्वामहस्तस्य पार्वति।

तत्त्वमुद्रा समाख्याता तर्पणे तां नियोजयेत्॥

स्वतन्त्रे -

अङ्गुष्ठानामिकायोगाद्वामहस्तस्य पार्वति।

तर्पयेत्कालिकां देवीं सायुधां सपरीकराम् ॥

नित्योत्सवे -

वामानामाङ्गुष्ठयोगे तत्त्वमुद्रा ।

## ज्ञानमुद्रा

ज्ञानार्णवे -

तर्जन्यङ्गुष्ठयोगे तु दक्षहस्ते तु पार्वति ।

अक्षमालेति मुद्रेयं ज्ञानमुद्रा च वै भवेत् ॥

रुद्रयामले -

श्लिष्टाग्रेऽङ्गुष्ठतर्जन्यौ ज्ञानमुद्रा प्रकीर्तिता ॥

नित्योत्सवे -

दक्षाङ्गुष्ठतर्जनीयोगो ज्ञानमुद्रा ।

## आवाहिन्यादि मुद्राः

### आवाहिनी मुद्रा

ऊर्ध्वाञ्जलिमथः कुर्यादियमावाहिनी भवेत्।

प्रपञ्चसारे -

सम्यक्सम्पूरितः पुष्पैः कराभ्यां कल्पितोऽञ्जलिः।

अवाहिनी समाख्याता मुद्रा देशिकसत्तमैः॥

राघवभट्टस्तु -

हस्ताभ्यामञ्जलिं कृत्वाऽनामामूलपर्वणोः।

अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा त्वावाहिनी स्मृत्वा॥

नित्योत्सवे -

विततोत्तान ऊर्ध्वाधो व्यापारितोऽञ्जलीः आवाहनी।

### स्थापिनी मुद्रा

इयं तु विपरीता स्यात्तदा वै स्थापिनी मता॥

**सन्निधापिनी मुद्रा**

मिलितं मुष्टियुगलं सन्निधापनरूपिणी।

नित्योत्सवे -

उदङ्गुष्ठयोः मुष्ट्योरभिमुखयोगे सन्निधापिनी।

अन्यत्र -

आश्लिष्टमुष्टियुगला प्रोन्नताङ्गुष्ठयुग्मका।

सन्निधाने समुद्दिष्टा मुद्रेयं तन्त्रवेदिभिः॥

**सन्निरोधिनी मुद्रा**

अन्तरङ्गुष्ठमुष्टिभ्यां सन्निरोधनरूपिणी॥

अन्यत्र -

अङ्गुष्ठगर्भिणी सैव सन्निरोधे समीहिता॥

नित्योत्सवे -

सैवाकनिष्ठामूलं अन्तःप्रविष्टाङ्गुष्ठ मिथः स्पृष्टनखा सन्निरोधिनी।

**सम्मुखीकरणी मुद्रा**

उत्तानौ द्वौ कृतौ मुष्टी सम्मुखीकरणी स्मृता ॥

नित्योत्सवे -

सन्निधापिन्येव तिरः प्रयोजिता सम्मुखीकरणी ।

**अवगुण्ठनी मुद्रा**

दक्षिणामूर्तिसंहितायाम् -

एतस्या एव मुद्रायास्तर्जन्यौ सरले यदा ।

सव्यापसव्यभ्रमणान्मुद्रेयमवगुण्ठनी ॥

ज्ञानार्णवे -

सव्यहस्तकृता मुष्टिः दीर्घाधोमुखतर्जनी ।

अवगुण्ठनमुद्रेयमभितो भ्रामिता सती ॥

नित्योत्सवे -

अधोमुखस्य दक्षवाममुष्टिद्वयस्य प्रसारितयोः तर्जन्योः स्वस्वभागमारभ्य क्रमेण लक्ष्यं परितः प्रादक्षिण्य वामावर्ताभ्यां परिभ्रमणे अवगुण्ठनम् ।

**सकलीकरण मुद्रा**

सारसङ्ग्रहे -

अङ्गमन्त्रैर्न्यसेद्देवि देव्यङ्गे साधकोत्तमः ॥

पूर्णानन्दस्तु -

पुष्पैः देवतामूर्तौ न्यासो बोध्यः ।

**धेनुमुद्रा**

तन्त्रराजे -

परिवर्त्य करौ पश्चात्तर्जनीमध्यमायुगम् ।

कनिष्ठानामिकायुग्मं परस्परयुतं कुरु ।

धेनुमुद्रेयमाख्याता अमृतीकरणं भवेत् ॥

कालीतन्त्रे -

अन्योन्याभिमुखं श्लिष्टा कनिष्ठानामिका पुनः ।

तथा च तर्जनीमध्या धेनुमुद्राऽमृतप्रदा ॥

नित्योत्सवे -

अभिमुखमन्योन्यग्रथितानां दक्षवामकराङ्गुलीनां क्रमेण कनिष्ठानामे तर्जनीमध्यमे च संयोज्य अधोमुखीकरणे धेनुः।

## प्राणायाम मुद्रा

ज्ञानार्णवे -

कनिष्ठानामिकाङ्गुष्ठैः यन्नासापुटधारणम्।
प्राणायामः स विज्ञेयः तर्जनीमध्यमे विना॥

## ऋष्यादि न्यास मुद्राः

मत्स्यसूक्ते -

ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे।
देवतां हृदये चैव बीजं तु गुह्यदेशके।
शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत्॥

अन्यत्र -

सम्प्रदायात् नाभौ कीलकमित्याहुरिति।

## सुमुखमुद्रा

नित्योत्सवे -

विकसित कल्प उत्तानाञ्जलिः सुमुखः।

## सुवृत्तमुद्रा

नित्योत्सवे -

सुमुखमेव मुष्टीकृतं सुवृत्तम्।

## चतुरश्रमुद्रा

नित्योत्सवे -

ऊर्ध्वाधः स्थितयोः दक्षवामकरतलयोः अङ्गुलीनां मिथो मणिबन्धसम्बन्धे चतुरश्रम्।

## मुद्गरमुद्रा

नित्योत्सवे -

अधरोत्तरस्य वामदक्षमुष्टियुगस्य स्वाभिमुख्येन योजने मुद्गरः।

## ग्रासमुद्रा

नित्योत्सवे -

उदग्राणां विरलानां वामकराङ्गुलीनां ईषदाकुञ्चने ग्रासः।

## प्राणादि पञ्चमुद्राः

बृहद्वामकेश्वरे -

कनिष्ठानामिकाङ्गुष्ठयोगः प्राणस्य मुद्रिका ।

तया ग्रासं गृहीत्वा तु प्राणायेति हुनेत्सदा ॥

तर्जनीमध्यमाङ्गुष्ठयोगेनापानकं वदेत् ।

ङेन्तं स्वाहान्तमथ च व्यानाय च ततो वदेत् ॥

स्वाहाऽथ मध्यमानामाङ्गुष्ठयोगेन निर्वपेत् ।

हित्वा कनिष्ठां सर्वाभिरुदानायाग्निगेहिनीम् ।

सर्वाभिस्तु समानाय स्वाहोक्त्वा ग्रासमावपेत् ॥

कुलरहस्यप्रकाशे -

स्पृशेत् कनिष्ठोपकनिष्ठिके द्वे

स्वाङ्गुष्ठमूर्ध्ना प्रथमेह मुद्रा ।

तथाऽपरा तर्जनिमध्यमे स्यात्

अनामिकामध्यमिके च मध्या ॥

अनामिकातर्जनिमध्यमाश्च

तद्वच्चतुर्थी सकनिष्ठिकास्ताः ।

स्यात्पञ्चमी मध्यमतः प्रदिष्टाः

प्राणादिमुद्राः निजमन्त्रयुक्ताः ॥

नित्योत्सवे -

मध्यमातर्जन्यङ्गुष्ठयोगे प्राणमुद्रा ।

मध्यमानामाऽङ्गुष्ठमेलने अपानस्य ।

कनिष्ठाऽनामाऽङ्गुष्ठसम्बन्धे व्यानस्य ।

तर्जन्यनामाऽङ्गुष्ठमिश्रणे उदानस्य ।

सर्वाङ्गुलिसंश्लेषे समानस्य ।

## नाराच मुद्रा

नित्योत्सवे -

वाममुष्टेः अङ्गुष्ठाग्र चुम्बित मूलपर्वणि तर्जन्मामीषदधोमुखप्रसृतायां नाराचः ।

## हृदयादि षण्मुद्राः

बृहद्वडबानले -

हृदये मध्यमानामतर्जनीभिन्र्यसेद्बुधः ।

मध्यमातर्जनीभ्यां च शिरसि न्यासमाचरेत् ॥

अङ्गुष्ठेन शिखायां च दशभिः कवचे न्यसेत् ।

नेत्रेषु तिसृभिश्च स्यादस्त्रमूर्ध्वोर्ध्वगं त्रिशः ।

मध्यमातर्जनीभ्यां स्यादङ्गमुद्राः स्मृता इमाः ॥

नित्योत्सवे -

तर्जनीमध्यमानामाऽग्रैः हृदयस्पर्शे हृदयम् ।

मध्यमाऽनामाऽग्रयोः ब्रह्मरन्ध्रसम्बन्धे शिरः ।

अङ्गुष्ठाग्रचूलीयोगे शिखा ।

व्यत्ययहस्तयोरधरोत्तरं वामहस्तदक्षकरयोः सर्वाङ्गुलीभिः अम्ससम्बन्धे कवचम् ।

तर्जनीमध्यमाऽनामाऽग्रैः नेत्रयुगमध्यस्पर्शे नेत्रम् ।

लक्ष्यमभितः छोटिकां दत्वा दक्षमध्यमातर्जनीभ्यां अधिवामकरतलं त्रिस्ताडने अस्त्रम् ।

## सर्वसाधारण न्यास मुद्रा

गुप्तार्णवे -

अङ्गुष्ठानामिकाभ्यां तु न्यासः सर्वत्र सम्मतः ॥

नित्योत्सवे -

अङ्गुष्ठमिलितया अनामिकया तत्तदङ्गस्पर्शे न्यासमुद्रा ।

## मातृकान्यास मुद्राः

दत्तात्रेयसंहितायाम् -

ललाटेऽनामिकामध्ये विन्यसेन्मुखवृत्तके ।

तर्जनीमध्यमानामा नेत्रयोश्चैव विन्यसेत् ॥

अङ्गुष्ठं कर्णयोः न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः ।

मध्यास्तिस्त्रो गण्डयोश्च मध्यमामोष्ठयोर्न्यसेत् ॥

अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके ।

मुखेऽनामां मध्यमाञ्च हस्ते पादे च पार्श्वयोः ॥

कनिष्ठानामिका मध्यास्तास्तु पृष्ठे प्रविन्यसेत् ।

ताः साङ्गुष्ठाः नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् ॥

हृदये च तलं सर्वमम्सयोश्च ककुत्स्थले ।

हृत्पूर्वं हस्तपत्कुक्षिमुखेषु तलमेव हि ॥

एतास्तु मातृकामुद्राः क्रमेण परिकीर्तिताः ।

अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः ॥

पूर्णानन्दनाथस्तु -

मूलाधारादिषु मनसा न्यासो बोध्यः ।

## व्यापक मुद्रा

परमानन्दतन्त्रे -

तलाभ्यां निखिलाङ्गस्य स्पर्शनं व्यापकं भवेत्।

## पञ्चोपचार मुद्राः

रुद्रयामले -

मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति।

दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः॥

अङ्गुष्ठतर्जनीभ्यां तु यन्त्रे पुष्पं निवेदयेत्।

अधोमुखं करं कृत्वा तर्जन्यग्रे तु योजयेत्॥

अङ्गुष्ठाग्रं तु मुद्रेयं पुष्पाख्या परमेश्वरि।

यथा गन्धं तथा देवि धूपं दद्याद्विचक्षणः॥

मध्यमानामिकाभ्यां तु मध्ये पर्वणि देशिकः।

अङ्गुष्ठाग्रेण देवेशि धृत्वा दीपं निवेदयेत्॥

## बलिहरण मुद्राः

ऊर्ध्वाम्नायतन्त्रे -

अङ्गुष्ठानामिकाभ्यां तु वटुकाय बलिर्मतः।

कनिष्ठाङ्गुष्ठयोगेन योगिनीबलिमाहरेत्॥

अङ्गुष्ठतर्जनीभ्यां तु क्षेत्रपालबलिं हरेत्।

वाममुष्टेऽस्तु मध्यस्थामङ्गुलिं दण्डवत्कुरु॥

गजदन्तमहामुद्रा गणपस्य बलौ भवेत्।

अङ्गुलीभिश्च सर्वाभिरुक्तो भूतबलिः प्रिये॥

वामाङ्गुष्ठमध्यमायोगेन राजराजेश्वरबलिरिति सम्प्रदायात्।

षडब्जारण्ये त्वां समयिन इमे पञ्चकसमाम्

यदा संविद्रूपां विदधति च षोढैक्यकलिताम्।

मनो जित्वा चाज्ञासरसिजमिह प्रादुरभवत्

तटिल्लेखा नित्या भगवति तवाधारसदनात्॥

॥ नमो नमस्ते शिव कामकोटी॥

Sri Kamakoti Mandali – 2007 [srigurupaduka@yahoo.com]

http://kamakshi16.tripod.com